कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।

रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १४.१६ ॥

karmaṇaḥ sukṛtasyāhuḥ sāttvikaṁ nirmalaṁ phalam |
rajasastu phalaṁ duḥkhamajñānaṁ tamasaḥ phalam || 14.16||

सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ।

प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १४.१७ ॥

sattvātsañjāyate jñānaṁ rajaso lobha eva ca |
pramādamohau tamaso bhavato'jñānameva ca || 14.17||

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।

जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ १४.१८ ॥

ūrdhvaṁ gacchanti sattvasthā madhye tiṣṭhanti rājasāḥ |
jaghanyaguṇavṛttisthā adho gacchanti tāmasāḥ || 14.18||

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।

गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १४.१९ ॥

nānyaṁ guṇebhyaḥ kartāraṁ yadā draṣṭānupaśyati |
guṇebhyaśca paraṁ vetti madbhāvaṁ so'dhigacchati || 14.19||

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।

जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ १४.२० ॥

guṇānetānatītya trīndehī dehasamudbhavān |
janmamṛtyujarāduḥkhairvimukto'mṛtamaśnute || 14.20||